योगवासिष्ठः/प्रकरणम् ६ (निर्वाणप्रकरणस्य उत्तरार्धम्)/सर्गः १४०

चत्वारिंशदधिकशततमः सर्गः १४०

व्याध उवाच ।

भगवंस्त्वादृशस्तां तामवस्थां च कथं गतः ।

कथं ध्यानप्रयोगेण तदा नोपशमं गतः ।। १

मुनिरुवाच ।

कल्पान्तेषु विनश्यन्ति नाशैर्नानाविधात्मभिः ।

जगन्ति भ्रान्तिरूपाणि नभस्याभासरूपिभिः ।। २

कदाचित्क्रमशो नाशः कल्पान्ते संप्रवर्तते ।

अशङ्कितं कदाचिद्द्रागेकधादिविकारतः ।। ३

तदा द्रागित्येव यदा विकृतं वारि तत्तथा ।

तेन यावत्सरन्त्याद्यं तावन्नीता जलैः सुराः ।। ४

अन्यच्च विपिनाधीश कालः सर्वंकषो ह्ययम् ।

यत्र काले ततस्तस्मिंस्त्ववश्यंभावि तत्तथा ।। ५

बलं बुद्धिश्च तेजश्च क्षयकाल उपस्थिते ।

विपर्यस्यति सर्वत्र सर्वथा महतामपि ।। ६

अन्यच्च विपिनाधीश मयैतत्तव वर्णितम् ।

स्वप्नदृष्टं किल स्वप्ने किं न संभवतीह कम् ।। ७

व्याध उवाच ।

असदेतद्यदि विभो स्वप्नसंभ्रममात्रकम् ।

कथितेन तदैतेन कोऽर्थः कल्याणकोविद ।। ८

मुनिरुवाच ।

त्वद्बोधनात्मकं कार्यं महदस्त्यत्र बुद्धिमन् ।

एतद्भ्रमात्मकं वेत्ति भवान्सत्यं तु मे श्रृणु ।। ९

अनन्तरमहं तस्मिन्मत्तैकार्णवरंहसि ।

जन्तोरोजः स्थितः स्वप्ने भ्रान्तं भ्रान्तो व्यलोकय ।। १०

यावत्ससकलं वारि क्वापि निर्गन्तुमुद्यतम् ।

विक्षुब्धवज्रवित्रस्तसपक्षाद्रीन्द्रवृन्दवत् ।। ११

लब्धवानुह्यमानोऽहं कंचिद्दैववशात्तटम् ।

अवसं तमवष्टभ्य शिखरप्रान्तसंनिभम् ।। १५

अथ क्षणेन सलिलं तदशेषेण निर्ययौ ।

वीच्यग्रस्फुटिताकारैर्देवैस्तारकिताम्बरम् ।। १३

तारागणैश्च पातालगतैर्मणिमयोदरम् ।

आवर्तेषु परावृत्तैः स्फारमद्रिजरत्तृणैः ।। १४

हेमद्वीपोपमैर्व्याप्तं गीर्वाणपुरमन्दिरैः ।

भ्रमत्सुराङ्गनालीननलिनीजालमालितम् ।। १५

मध्योह्यमानकल्पाभ्रनीलशैवालजालकम् ।

विद्युद्गोरोचनाम्भोदनीलनीरजनिर्भरम् ।। १६

स्फुरत्सीकरनीहारमेघाद्रिकृतदिक्तटम् ।

उल्लोलद्वीचिसंदिग्धवहत्कल्पद्रुमव्रजम् ।। १७

अथैकार्णवखातोऽसावभवच्छुष्ककोटरः ।

क्वचिद्दलितसह्याद्रि क्वचित्संशीकमन्दरः ।। १८

क्वचित्कङ्कनिमग्नेन्दुयमवासवतक्षकः ।

क्वचित्पङ्कनिमग्नाधःशाखकल्पद्रुमोत्करः ।। १९

क्वचित्कमलवत्कीर्णलोकपालशिरःकरः ।

क्वचित्पङ्कजविश्रान्तरुधिरह्रदपाटलः ।। २०

क्वचिदाकण्ठनिर्मग्नक्वणद्विद्याधरीगणः ।

क्वचित्स्वप्नमृतेभाभयाम्योग्रमहिषावृतः ।। २१

क्वचित्सन्नमहाकायगरुडामरपर्वतः ।

क्वचिन्मत्तमहासेतुर्यमदण्डेन भूजुषा ।। २२

क्वचित्प्रमृतवैरिञ्चहंससस्मितपङ्कभूः ।

क्वचित्पङ्कविनिर्मग्नदेहार्धामरवारणः ।। २३

एतस्मिन्नन्तरे तत्र सानुं प्राप्याश्रमे श्रमात् ।

विश्रान्तोस्मि यदा तेन भृशं निद्राजगाम माम् ।। २४

ततः सुषुप्तनिद्रान्तस्तया वासनयान्वितः ।

तं तादृगेव कल्पान्तमपश्यं स्वौजसि स्थितः ।। २५

दृष्ट्वा तद्द्विगुणं दुःखं चिरेणात्राहमाकुलः ।

प्रबुद्धो दृष्टवान्सानुं तमेवास्य हृदि स्थितम् ।। २६

अथ तत्र द्वितीयेऽह्नि भास्करोदयसुन्दरम् ।

सलोकाकाशभूशैलं भुवनं दृष्टवानहम् ।। २७

द्यौः क्षमा वायुराकाशं पर्वताः सरितो दिशः ।

इति मे चेतसो जातं पत्रादि विटपादिव ।। २८

ततस्तस्मिंस्तथा दृष्टे भूतले तैः पदार्थकैः ।

व्यवहारं प्रवृत्तोऽहं किंचिद्विस्मृतधीरितः ।। २९

जातस्य मेऽद्य वर्षाणि षोडशैष पिता मम ।

इयं मातास्पदं चेदमिति मे प्रतिमोदभूत् ।। ३०

अपश्यं ग्रामकं कंचित्कंचिच्च ब्राह्मणाश्रमम् ।

किंचिद्देहं तथा कश्चिद्बन्धुः कस्मिंश्चिदाश्रमे ।। ३१

अथ मे तिष्ठतः सार्धं बन्धुभिर्ग्राममन्दिरे ।

अहोरात्रेषु गच्छत्सु जाग्रदादींस्तदेव सत् ।। ३२

ततः कालवशात्तत्र प्राक्तनी बोधधीर्मम ।

विस्मृता तादृशाभ्यासादहो तस्येव मत्स्यता ।। ३३

इत्यहं ग्रामवास्तव्यः संपन्नो ब्राह्मणस्तदा ।

देहमात्रकबद्धास्थो दूरीकृतविवेकभूः ।। ३४

शरीरमात्रात्मवपुर्दारमात्रानुरञ्जितः ।

वासनामात्रसारात्मा धनमात्रैकतत्परः ।। ३५

जीर्णगोमात्रकधनः संरोपितलतावृतिः ।

संचिताग्न्यवनिप्राणिरुपार्जितकमण्डलुः ।। ३६

चलवृक्षकबद्धास्थो लोकाचाररतः सदा ।

गृहपार्श्वगतानीलशाद्वलस्थलिकास्थितिः ।। ३७

शाकशाकायतारामरचनानीतवासरः ।

सरिद्ध्रदनदीतीर्थसरसि स्नानतत्परः ।। ३८

गोमयान्नजलाम्ब्वग्निकाष्ठेष्टा कष्टसंचयी ।

इदं कार्यमिदं नेति पाशाभ्यां विवशीकृतः ।। ३९

इति मे जीवतस्तत्र संवत्सरशतं गतम् ।

एकदाभ्यागतो दूरात्तापसोऽतिथिरात्मवान् ।। ४०

पूजितोऽसौ विशश्राम मद्गृहे स्नानपूर्वकम् ।

भुक्तवाञ्छयने स्थित्वा रात्रौ वर्णितवान्कथाम् ।। ४१

नानादिग्देशशैलोर्वीव्यवहारमनोहरे ।

कथाप्रसङ्गे कस्मिंश्चिन्नानाविधरसाश्रये ।। ४२

सर्वं चिन्मात्रमेवेदमनन्तमविकारि च ।

जगत्तयेव कचति यथास्थितमपि स्थितम् ।। ४३

इत्यहं बोधितस्तेन बोधैकघनतां गतः ।

स्मृतवांस्तमशेषेण वृत्तान्तं धारणावशात् ।। ४४

स्मृतवानात्मवृत्तान्तं यस्याहमुदरे स्थितः ।

तं विराडपमाशङ्क्य तस्मान्निर्गन्तुमुद्यतः ।। ४९

तदास्यं निर्गमद्वारमथ जानामि नो यदा ।

विस्तीर्णे भुवने यस्मिन्भूम्यब्ध्यद्रिसरिद्वृते ।। ४६

तदा तमत्यजन्नेव देशं बन्धुजनावृतम् ।

तस्य प्राणं प्रविष्टोऽहं निर्गन्तुं पवनं बहिः ।। ४७

इहस्थस्य विराजोऽस्य बाह्यमाभ्यन्तरं तथा ।

अन्यजं सर्वमीक्षेऽहमिति निर्णीय तादृशम् ।। ४८

धारणां संविदा बद्ध्वा प्रदेशं स्वं तमत्यजम् ।

तत्प्राणैः सह निर्यात आमोदः कुसुमादिव ।। ४९

पवनस्कन्धमासाद्य प्राप्य तन्मुखकोटरम् ।

बहिर्वातरथेनाहं निर्गतो दृष्टवान्पुरः ।। ५०

यावत्तथैव मद्देहो बद्धपद्मासनः स्थितः ।

क्वापि मुन्याश्रमः शिष्यैः पालितो गिरिकन्दरे ।। ५१

पुरो मे तिष्ठतां तेषां मत्संरक्षणकर्मणाम् ।

मुहूर्तमात्रं च गतः कालश्चान्ते निवासिनाम् ।। ५२

हृदयं संप्रविष्टोऽसौ यस्याहं स पुमानपि ।

पृष्ठेनोत्सवलब्धेन शेते तृप्तोऽन्धसा सुखम् ।। ५३

तदाश्चर्यं मया दृष्ट्वा नोक्तं किंच न कस्यचित् ।

पुनस्तस्यैव हृदयं प्रविष्टः कौतुकादहम् ।। ५४

प्राप्तोऽस्म्योजःप्रदेशं तं तस्य तस्मिन्हृदन्तरे ।

अवेक्षितुं स्वबन्धूंस्तान्व्याप्तो वासनया तया ।। ५५

यावत्तत्र युगस्यान्तः संप्रवृत्तोऽतिदारुणः ।

भुवनं तद्विपर्यासमागतं सह संस्थया ।। ५६

अन्य एवाचलास्तत्र वसुधान्या च संस्थिता ।

अन्य एव ककुब्भेदस्तथान्या भुवनस्थितिः ।। ५७

ते बन्धवः स च ग्रामः स भूभागः स दिक्तटः ।

न जाने क्व गतं सर्वं व्यूह्य नीतमिवानिलैः ।। ५८

तदा पश्यामि भुवनं यावदन्यदवस्थितम् ।

अपूर्वसंनिवेशं तज्जगदन्यदिवोदितम् ।। ५९

तपन्ति द्वादशादित्याः प्रज्वलन्ति दिशो दश ।

शीताश्यानाम्बुवच्छैलाः प्रवृत्ता गलितुं बलात् ।। ६०

अद्रावद्रौ दिशिदिशि ज्वलन्ति वनपङ्क्तयः ।

दग्धाः स्मृतिपदं याताः समस्ता रत्नभूतयः ।। ६१

सर्व एवाब्धयः शुष्का महावाताः पुरःस्थिताः ।

अङ्गारराशितां यातं भूमण्डलमशेषतः ।। ६२

पातालतो भूतलतोऽथ दिग्भ्यो

ज्वाला विनिर्गन्तुमनुप्रवृत्ताः ।

संध्याभ्रवच्चाशु बभूव विश्वं

ज्वालामये मण्डलमेकमेव ।। ६३

ज्वालामये सद्मनि हेमपद्म-

कोशे भ्रमद्भृङ्ग इव प्रविष्टः ।

ततोऽहमाराच्छलभक्रमेण

न चाप्तवान्दाहविकारदुःखम् ।। ६४

ज्वालामये साधु महाम्बुवाहे

भ्रमाम्यहं विद्युदिवानिलात्मा ।

ज्वालापरिस्पन्दविलोलवर्ष्मा

स्थलाब्जखण्डभ्रमरोपमश्रीः ।। ६५

इत्यार्षे श्रीवासिष्ठमहारामायणे वा० दे० मो० नि० उ० अ० वि० हृदयकल्पनावर्णनं नाम चत्वारिंशदधिकशततमः सर्गः ।। १४० ।।